# श्रीसोमनाथसंस्कृतयुनिवर्सिटी,वेरावलम्

## सत्रान्तपरीक्षा – डिसेम्बर – २०१८

**कक्षा** – शास्त्रीद्वितीयवर्षम् (SEM- 3) **प्रश्नपत्रम्** – ७ **गुणाः** - ७०

**विषयः** - साहित्यम् **कोड – CE 2.3.5.** **समयः** - ०२ तः ०५

**(NEW & OLD)**

**दिनाङ्कः** - ११/१२/२०१८ **सन्दर्भग्रन्थः** – दशरूपकम् (प्रथम-द्वितीयप्रकाशौ)

---

### प्रथमान्वितिः (Unit-1)

**प्रश्नः – १ निम्नलिखितेषु द्वयोः ससन्दर्भं व्याख्यां कुरुत ।** १०

(१) अवस्थानुकृतिर्नाट्यं रूपं दृश्यतयोच्यते ।
रूपकं तत्समारोपात् दशधैव रसाश्रयम् ॥

(२) प्रस्तुतागन्तुभावस्य वस्तुनोऽन्योक्तिसूचकम् ।
पताकास्थानकं तुल्यसंविधानविशेषणम् ॥

(३) रत्यर्थेहा विलासः स्यात् दृष्टनष्टानुसर्पणम्
परिसर्पो विधूतं स्यादरतिः तच्छमः शमः ॥

**प्रश्नः – २ आचार्यधनञ्जयस्य जीवनपरिचयः विस्तरेण लेख्यः ।** १०

**अथवा**

**सन्धिसामान्यलक्षणं विलिख्य प्रतिमुखसन्धिः साङ्गं निरूपणीयः ।**

### द्वितीयान्वितिः (Unit-2)

**प्रश्नः – ३ अधोलिखितेषु द्वयोः सन्दर्भपुरस्सरं व्याख्या कार्या ।** १०

१. इष्टस्यार्थस्य रचना गोप्यगुप्तिः प्रकाशनम् ।
रागः प्रयोगस्याश्चर्यं वृत्तान्तस्यानुपक्षय ।

२. त्रिपताकाकरेणान्यानपवार्यान्तरा कथाम् ।
अन्योन्यामन्त्रणं यत्स्याज्जनान्ते तज्जनान्तिकम् ॥

३. पताकानायकस्त्वन्यः पीठमर्दो विचक्षणः ।
तस्यैवानुचरो भक्तः किञ्चिदूनश्च तद्गुणैः ॥

**प्रश्नः – ४ निर्वहणसन्धेः साङ्गं निरूपणं कुरुत ।** १०

**अथवा**

**नाटकसामान्यलक्षणं विलिख्य तद्भेदान् लिखत ।**

## तृतीयान्विति:(Unit - 3)

**प्रश्नः – ५ निम्नलिखितेषु द्वयोः ससन्दर्भं व्याख्यां कुरुत।** **१०**

१) मुग्धा नववय:कामा रतौ वामा मृदु: क्रुधि।
मध्योद्यद्यौवनानङ्गा मोहान्तसुरतक्षमा।

२) अल्पालाप: सश्रृङ्गारो हावोऽक्षिभ्रूविकारकृत्।
स एव हेला सुव्यक्तश्रृङ्गाररससूचिका॥

३) नर्मस्फिञ्ज: सुखारम्भो भयान्तो नवसङ्गमे।
नर्मस्फोटस्तु भावानां सूचितोऽल्परसो लवै॥

**प्रश्नः – ६ नायिकालक्षणं लिखित्वा तद्भेदान् ग्रन्थोक्तदिशा लिखत।** **१०**

**अथवा**

**ग्रन्थोक्तदिशा योषिदलङ्कारान् लिखत।**

## अन्वितय: १ – ३ (Unit 1 – 3)

**प्रश्नः – ७ अधोलिखितप्रश्नानाम् एकवाक्येन उत्तराणि लिखत। (कनिचित् दश एव)** **१०**

१) दशरूपके कति प्रकाशा: सन्ति ?

२) प्रथमप्रकाशे कति कारिका: सन्ति ?

३) अर्थप्रकृतय: कति सन्ति ? नामानि लिखत।

४) रूपकाणि कति सन्ति ? नामानि लिखत।

५) गर्भसन्धे: कति अङ्गानि वर्तन्ते ?

६) सन्ध्यङ्गानां कति प्रयोजनानि सन्ति ?

७) कति अर्थोपक्षेपका: सन्ति ? नामानि लिखत।

८) द्वितीयप्रकाशे कति कारिका: सन्ति ?

९) नायकसात्त्विकगुणा: कति सन्ति ?

१०) अवस्थानुसारं नायिका कतिविधा?

११) योषिदलङ्कारेषु कति शरीरजा: अलङ्कारा: ?

१२) कति वृत्तय: सन्ति ? नामानि लिखत।

१३) श्रृङ्गाररसे का वृत्ति: भवति ?

१४) नाट्ये प्राय: स्त्रीणां का भाषा भवति ?

१५) सर्वत्र का वृत्ति: भवति ?

*****************